जात्याकृतिव्यक्तयः पदार्थः इति नैय्यायिकमतविचारः।

Ajimon C.S.
Asst. Professor, Government Sanskrit College, Tripunithura

पदशक्तिविषये दार्शनिकाः भिन्नाभिप्रायिनः भवन्ति। नैय्यायिका जात्याकृतिविशिषिटव्यक्तौ पदशक्तिं स्वीकुर्वन्ति। मीमांसकाः जातौ, वैय्याकरणाः वाक्ये चशक्तिंस्वीकुर्वन्ति।न्यायमतेपदज्ञानंशाब्दबोधस्यकरणंभवति।पदार्थस्मृतिरूपपदार्थधीः शाब्दबोधस्य व्यापारो भवति। शक्तिधीः तत्र सहकारिकारणं एव। पूर्वं शक्तिगृहीतस्य पदज्ञाने सत्येव पदार्थस्मृतिर्भविष्यति। एवं प्रथमं शक्तिज्ञानवतः पदस्य ज्ञानं ततः पदार्थस्मृति तदनन्तरं पदार्थान्वयरूपः शाब्दबोधः जायते।अतः शाब्दबोधे शक्तिग्रहस्य प्राधान्यं वर्तते। अत्र न्यायमतमनुसृत्य पदस्य कुत्र शक्तिरिति निरूपयति। न्यायसूत्रकारः व्यक्त्याकृतिजातयस्तु पदार्थः इति सूत्रेण पदार्थविचारः करोति।[1] व्यक्त्याकृतिजातीनां मिलितानामेव पदार्थत्वं न तु केवल व्यक्तेः आकृतेः जातेर्वा। यद्वा जात्याकृतिविशिष्टायाः व्यक्तेः पदार्थत्वं न तु तेषां प्रत्येकमिति। सूत्रस्थ तु शब्देन विशेषः बोध्यते। कः विशेषः इति चेत् जातौ आकृतौ व्यक्तौ वा विशेषणविशेष्यभावनियमो नास्ति इत्येतदेव। कदाचित् आकृतेः कदाचित् व्यक्तेः कदाचित् जातेः च प्राधान्यं भवति। भेदविवक्षायां पदार्थे व्यक्तेः प्राधान्यं, तदा इतरयोः अङ्गत्वं। विशेषावगतौ च व्यक्तेरेव प्राधान्यमित्यर्थः। यतः भेदः विशेषः च व्यक्तिनिरूपितः भवति। यत्र भेदविवक्षा नास्ति किन्तु सामान्यरूपेण ज्ञानं अस्ति तत्र जातेः प्राधान्यं। तदा व्यक्ते आकृतेः अङ्गत्वं। गोदर्शनं शुभं इत्यादौ जातेः प्राधान्यं। इयं गौः कृष्णा इत्यादौ व्यक्तेः प्राधान्यमस्ति। पिष्कमयी गौः इत्यादिस्थले आकृतेरेव प्राधान्यम्। एवं व्यक्त्याकृतिजातीनां मिलितानामेव पदार्थत्वम्।

अत्र कः व्यक्तिरिति चेत् व्यक्तिर्गुणविशेषाश्रयो मूर्तिः इति सूत्रकारः।[2] रूपादिविशेषगुणाश्रयभूता मूर्तिः व्यक्तिरित्यर्थः। व्यज्यते इति व्यक्तिः –इन्द्रियग्राह्या इति। सर्वेषां द्रव्याणां व्यक्तित्वं नास्ति किन्तु इन्द्रियग्राह्यत्वे सत्येव व्यक्तित्वं। व्यज्यते इत्यस्य इन्द्रियग्राह्या इत्यर्थः। सूत्रे वर्तमानस्य मूर्तिः इति पदस्य मूर्च्छितत्वयनत्त्वात् उपचितावयवत्त्वात् इत्यर्थः। रूपरसगन्धस्पर्शानां विशेषगुणानां गुरुत्वपतनघनत्वद्रवत्व संस्काराणां अव्यापिनः परिमाणस्य आश्रयो द्रव्यं व्यक्तिः।

आकृतिर्जातिलिङ्गाख्या इति सूत्रेण आकृतिलक्षणमुच्यते।[3] जातेः लिङ्गमिति यस्याः नाम सा आकृतिरिति सूत्रार्थः। लिङ्ग्यते ज्ञायते अनेनेति लिङ्गम्। अवयवसंस्थानविशेषरूपा आकृतिः। गोत्वादि जातेः ज्ञानं गवादीनां आकृत्या एव संभवति। सा आकृतिस्तु शिरःकराद्यवयवानां संयोगात् न अन्या। गोः शिरप्रभृति पादपर्यन्तानां अवयवैः गोत्वजातेः ज्ञानं जायते। यत्र जातेः आकृति व्यङ्ग्यत्वं नास्ति तत्र आकृतेः पदार्थत्वं नास्ति। यथा मृत् सुवर्णं इत्यादौ। मृतादौ नियतावयवव्यूहस्याभावात् मृत्वादीनां आकृतिव्यङ्ग्यत्वं नास्ति। मृत् सुवर्णं इत्यादि व्यवहारस्थले जातिव्यक्त्योरेव पदार्थत्वं।

समानप्रसवात्मिका जातिः इत्यनेन सूत्रेण जाति लक्षणमुच्यते[4]। भिन्नास्वपि गवादिषु इयं गौ इयं गौ इत्याकारका समाना बुद्धिरुत्पद्यते यया सा जातिः। यया बहूनि शरीराणि – व्यक्तयः परस्परं न व्यावर्त्यन्ते सा जातिः। यः पदार्थः अनेकव्यक्तिषु अनुवृत्तिप्रत्ययनिमित्तं तदेव जातिः। यच्च केषांचित् पदार्थानां अभेदं करोति केषांचित् पदार्थानां भेदं च करोति तत् जाति। गोत्वजाति गोव्यक्तीनां अभेदं करोति अश्वादिभ्यः गोव्यक्तीनां भेदं च करोति। न्यायसूत्रकारःकेवल व्यक्तेः जातेः आकृतेः च पदार्थत्वं निराकरोति। न तदनवस्थानात् इति सूत्रेण केवलव्यक्तेः पदार्थत्वं निषिध्यते[5]। व्यक्तेरनवस्थानात्- व्यभिचारात् न केवलव्यक्ते पदार्थत्वं –वाच्यत्वं संभवति। पदात् पदार्थबोधोत्पत्तिः शक्तिग्रहं विना शक्यते। पदस्य व्यक्तौ शक्ति स्वीकारे अनन्तासु व्यक्तिषु शक्तिग्रहो न संभवति। एकस्य गोव्यक्ते शक्तिग्रहे सति अन्यस्य गो व्यक्तिविषयकशाबादबोधोत्पत्तौ तत्र व्यभिचारः स्यात्। यस्य शक्तिर्गृह्यते तस्यैव शाब्दबोधो भविष्यति इत्येव नियमः। अयं नियमः व्यक्तौ शक्तिस्वीकारे उपपादयितुं न शक्यते। जात्यविशिष्टस्य व्यक्तेर्बोधः गवादि पदात् न जायते। अतः जातेः विशेषणत्वेन भासमानस्य व्यक्तेरेव बोधः पदात् निष्पद्यते। तेन केवलव्यक्तेः पदवाच्यत्वं न संभवति।

आकृतिः –तदपेक्षत्वात् सत्त्वव्यवस्थानसिद्धेः इति सूत्रेण केवलाकृतेरस्तु पदवाच्यत्त्वं इति पूर्वपक्षः वदति।[6] आकृतिस्तु अवयवसंयोगः। अवयवानां अवयवावयवानां च नियतः संयोगः आकृतिरित्यनेन उद्दिश्यते पूर्वपक्षेण। आकृति ग्रहणे एव अयं गौः अयं अश्वः इत्यादि सत्वबोधः। आकृति ज्ञाने सत्येव भवति व्यक्तिबोधः न तु तदभावे। अतः आकृतेः पदार्थत्वं अस्ति इति पूर्वपक्षः। किन्तु तन्न – य़ः जातिसंयुक्तः स एव

जातिविशिष्टः। जातिविशिष्टत्वं आकृतेः न संभवति, किन्तु नियतावयवव्यूहस्य द्रव्यस्य – व्यक्तेरेव तत्संभवति। तस्मात् जातिसंयुक्तत्वाभावात् आकृतिः न पदार्थः।
जातेरपि पदार्थत्वं निराक्रियते सूत्रकारेण। व्यक्त्याकृतियुक्तेष्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः –इति सूत्रेण जातेः पदार्थत्वं उच्यते पूर्वपक्षैः।[7] मृता निर्मितः गवि व्यक्तिरस्ति जातिरस्ति किन्तु तत्र मृद्गवकान् उद्दिश्य गां प्रोक्षय इत्यादि प्रयोगः नास्त्येव। तत्र कारणं तु तेषु जातिर्नास्ति इत्येतदेव इति पूर्वपक्षः। अत्र यदि व्यक्तिर्वा आकृतिर्वा पदार्थः तर्हि मृद्गवके अपि व्यक्त्याकृत्योः सत्वात् तत्रापि प्रोक्षणादि प्रसङ्गः स्यात्। किन्तु तथा नास्ति। जातेरभावादेव तादृशप्रयोगाप्रसङ्गः इति जातिरेव पदार्थः इति पूर्वपक्षाशयः। अस्य समाधानमुच्यते सूत्रकारेण न –आकृतिव्यक्त्यपेक्षत्त्वाज्जात्यभिव्यक्तेः इति सूत्रेण।[8]जातेः प्रतीतिः आकृतेः व्यक्तेः च प्रतीतिं अपेक्षते इत्यतः जातिर्न पदार्थः इति सूत्रार्थः। आकृतिं व्यक्तिं च विना केवलजातेः भानं न संभवति। एवं प्राचीननैय्यायिकमते जात्याकृतिव्यक्तीनां मिलितानामेव पदार्थत्वं न तु तेषं प्रत्येकम्।

नव्यनैय्यायिकः विश्वनाथपञ्चाननः स्वकीये न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे विषये अस्मिन् विचारः कृतः अस्ति। तत्र मीमांसकाः पूर्वपक्षाः। ते जातावेव शक्तिरिति वदन्ति। व्यक्तौ शक्तिं न अङ्गीकुर्वन्ति ते। तत्र कारणं तु व्यभिचारः आनन्त्यं च भवति। तदुच्यते- तत्र जातावेव शक्तिग्रहः, न तु व्यक्तौ, व्यभिचारादानन्त्याच्च व्यक्तिं विना जातिभानस्यासंभवात् व्यक्तेरपि भानमिति केचित्।[9] जातिविशिष्टे शक्तिस्वीकारे जातावपि अवश्यं शक्तिः स्वीकरणीया, अगृहीतविशेषणा बुद्धिर्विशिष्टेषु न उपजायत नियमात्। अतः लाघवात् जातौ शक्तिस्वीकारः एवोचितमिति मीमांसकाः। व्यक्तौ शक्ति स्वीकारे दोषद्वयो ते प्रदर्शितः- व्यभिचारः आनन्त्यं चेति। तथा च एकघटव्यक्तौ घटपदस्य शक्तिस्वीकारे तद्भिन्नघटविषयकशाब्दबोधोत्पत्तौ तत्र कार्यकारणभावे व्यभिचारः- शक्तिज्ञानरूपकारणाभावे अपि शाब्दबोधात्मककार्यसत्त्वात् । कारणाभावे कार्यसत्वं व्यतिरेकव्यभिचारः भवति। अयं तु दोषः अत्र एकव्यक्तौ शक्तिस्वीकारे एव भवति। यदि सर्वासु व्यक्तिषु शक्तिं स्वीकुर्वन्ति तर्हि आनन्त्यं नाम दोषः स्यात्। सकलव्यक्तिषु शक्तिस्वीकारे व्यक्तीनां आनन्त्यात् शक्तीनामपि आनन्त्यम्। व्यक्तौ शक्त्यभावे शाब्दबोधे व्यक्तेः भानं कथं स्यादिति चेत् व्यक्तिं विना जातिभानासंभवः इत्यतः जाति शक्त्या व्यक्तेरपि भानमिति मीमांसकाः।एवं व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधं

प्रति जातिविषयकशक्तिज्ञानमेव कारणं इति तेषामाशयः। किन्तु तन्न नैय्यायिकाः अङ्गीकुर्वन्ति। शाब्दबोधं प्रति पदज्ञानजन्यपदार्थोपस्थिते हेतुत्त्वमस्तीत्यतः शाब्दबोधे व्यक्तेः भानं तस्मिन् शक्त्यभावे नैव भवेत्। शाब्दबोधे जातिभानं प्रति जातिविशेष्यकशक्तिज्ञानं कारणं। व्यक्तिविशेष्यकशक्तिज्ञानरूपकारणं व्यक्तिभानं प्रति अवश्यमेव। तद्विषयकशाब्दबोधं प्रति तद्विषयकपदजन्योपस्थितेः हेतुत्त्वं इत्यतः व्यक्तिविषयकशाब्दबोधं प्रति व्यक्तिविषयकपदजन्योपस्थितेः हेतुत्त्वं। अतः व्यक्तौ शक्त्यभावात् तद्विषयकशाब्दबोधो न भवेत्। न च अत्र व्यक्तौ पदस्य शक्त्यभावेपि पदस्य व्क्तौ लक्षणां स्वीकृत्य शाब्दबोधः उपपादयितुं शक्यते इति चेन्न। अत्र लक्षणा स्वीकर्तुं बीजो नास्ति। तथाहि अन्ययानुपपत्तिः लक्षणाबीजं, तदभावे कथं पदस्य व्यक्तौ लक्षणा स्वीकर्तुं शक्यते इति नैय्यायिकाः पृच्छन्ति। यद्यपि गामानय इत्यादौ गोत्वजातेरानयनान्वयानुपपत्त्या गो पदस्य लक्षणया गो व्यक्तिरित्यर्थस्वीकारे अपि गौरस्ति इत्यादौ अन्वयानुपपत्तिर्नास्ति इति लक्षणाबीजाभावात् लक्षणा स्वीकर्तुं न शक्यते। अतः पदस्य अवश्यं व्यक्तौ शक्तिस्वीकरणीया इति नैय्यायिका। व्यक्तौ शक्तिस्वीकारे आनन्त्यं न, सकलव्यक्तौ एका एव शक्तेः स्वीकारात्। गोव्यक्तौ शक्तिस्वीकारे अननुगमकत्वप्रसङ्गः नास्ति, गोत्त्वादोरेव अनुगमकत्त्वात्। एवं गोविषयकशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानस्य हेतुत्वम्। ननु अत्र गो पदस्य गौरेव शक्या इति शक्तिग्रहः तदा गोव्यक्तौ शक्तिः, गोत्वं शक्यमिति शक्तिग्रहः तदा गोत्वं विशेष्यं भवतीत्यतः गोत्वप्रकारकगोविशेष्यकपदार्थस्मरणं तथाविधशाब्दबोधः च नैव भवेत्। यतः शक्तिज्ञाने यदंशः प्रकारः शाब्दबोधेपि स एव अंशः प्रकारो भवेत्,न शक्तिज्ञाने प्रकारत्वेन वर्तमानस्य शाब्दबोधे विशेष्यत्वं संभवति। तदुच्यते- यदि गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात् समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात्- इति।[10] यद्यत्र गोत्वं शक्यमिति स्वीकरोति तर्हि गोत्वत्वस्य शक्यतावच्छेदकत्वं वाच्यम्। गोत्वत्वं नाम गवेतरासमवेतत्वे सति सकलगोसमवेतत्वं। तदा मीमांसकमते गोव्यक्तीनां शक्यतावच्छेदके अनुप्रवेशरूपगौरवं वर्तते। अतः जात्याकृतिविशिष्टव्यक्तावेव पदस्य शक्तिः इति जात्याकृतिविशिष्टव्यक्तिरेव पदार्थः इति न्यायमतम्।

End Notes-

1. न्यायसूत्रम्- 2.2.67
2. न्यायसूत्रम्- 2.2.68
3. न्यायसूत्रम्- 2.2.69
4. न्यायसूत्रम्- 2.2.70
5. न्यायसूत्रम्- 2.2.62
6. न्यायसूत्रम्- 2.2.64
7. न्यायसूत्रम्- 2.2.65
8. न्यायसूत्रम्- 2.2.66
9. सिद्धान्तमुक्तावलि, शब्दखण्डः 372
10. सिद्धान्तमुक्तावलि, शब्दखण्डः 375

सहायकग्रन्थाः-

1. कारिकावली, क्रिष्णदास् अकादमी, वाराणसी, 1997.
2. तर्कसंग्रहदीपिका, केरला साहित्य अकादमी, 2009.
3. न्यायभाष्यम् बौद्धभारती सीरीस् 33, 1985
4. शब्दलक्षणप्रामाण्यविमर्शः, राष्ट्रियसंस्कृतसंस्थानम्, 1995.
5. Navya Nyaya system of Logic, Motilal Banarsidas,Delhi, 2016.